शब्दानां देशवाचित्वेऽपि तन्निवाससम्बन्धेन मनुष्येषु प्रवृत्तिः। अथवा क्षीरं पानं यत्र इति व्युत्पत्त्या देशो वाच्यः। भावकरणयोरनटो वा। क्षीरपाणं क्षीरपानम्। क्षीरं पीयतेऽनयेति क्षीरपाणी क्षीरपानी पात्री। इति मुग्धबोधटीकायां दुर्गादासः॥

क्षीरपायी, [न्] त्रि, (क्षीरं पिबति इति। "बहुलमाभीक्ष्ण्ये"। ३।२।८१। सुप्युपदे णिनिः।) दुग्धपानकर्त्ता। यथा। "क्षीरपायीत्यादिवाक्ये प्रकृत्यर्थावच्छिन्नकर्त्तृत्वार्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्रावच्छिन्नस्य ततः पानशीलसामान्यस्याप्रत्ययात्"। इति शब्दशक्तिप्रकाशिका॥

क्षीरमोरटः, पुं, (क्षीरवत् स्वादुः स्वादुर्वा मोरटः।) लताभेदः। तत्पर्य्यायः। सितद्रुः २ सुदृशः ३ क्षीरकः ४। इति रत्नमाला। अन्यत् मोरटशब्दे द्रष्टव्यम्॥

क्षीरवल्ली, स्त्री, (क्षीरयुक्ता क्षीरप्रधाना वा वल्ली।) क्षीरविदारी। इति राजनिर्घण्टः॥ (यथास्याः पर्य्यायाः।
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना गृष्टिर्वृदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

क्षीरविकृतिः, स्त्री, (क्षीरं विकृतिर्विकारोऽस्याः क्षीरवत् विकृतिर्निर्य्यासोऽस्याः वा।) कूर्च्चिका। इत्यमरः। २।९।४४॥ क्षीरसा इति भाषा॥

क्षीरविदारिका, स्त्री, (क्षीरयुक्ता क्षीरवत् शुभ्रा वा विदारिका।) क्षीरविदारी। इति शब्दरत्नावली॥

क्षीरविदारी, स्त्री, (क्षीरवत् शुभ्रा क्षीरप्रचुरा वा विदारी।) कृष्णभूमिकुष्माण्डः। तत्पर्य्यायः। महाश्वेता २ ऋक्षगन्धिका ३। इत्यमरः। इक्षुवल्लरी ५ इक्षुवल्ली ६ क्षीरकन्दः ७ क्षीरवल्ली ८ पयस्विनी ९ क्षीरशुक्ला १० क्षीरलता ११ पयःकन्दा १२ पयोलता १३ पयोविदारिका १४। अस्या गुणाः। मधुरत्वम्। अम्लत्वम्। कषायत्वम्। तिक्तत्वम्। पित्तशूल मूत्रमेहामयनाशित्वञ्च। (विदारीशब्देऽस्या अपर गुणा ज्ञेयाः॥)
"क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः।
विनालो रोगहर्त्ता स्याद्दयस्तम्भी सनालकः"॥
इति राजनिर्घण्टः॥

क्षीरविषाणिका, स्त्री, (क्षीरमिव शुभ्रं क्षीरयुक्तं वा विषाणं अग्रभागो यस्याः ततः कन् टाप् च।) वृश्चिकाली। क्षीरकाकोली। इति राजनिर्घण्टः॥

क्षीरवृक्षः, पुं, (क्षीरमयः क्षीरप्रधानो वा वृक्षः।) उडुम्बरवृक्षः। इति जटाधरः॥ क्षीरिका। इति भरतः॥ राजादनी। इति राजनिर्घण्टः॥ (यथा, सुश्रुते २४ अध्याये चिकित्सास्थाने।
"क्षीरवृक्षकषायैर्वा क्षीरेण च विमिश्रितैः"॥
राजादन्यर्थे पर्य्याया यथा,—
"राजादनः क्षीरवृक्षः पालाशी वानरप्रियः"॥
इति वैद्यकरत्नमालायाम्॥)

क्षीरशरः, पुं, (क्षीरं दुग्धं शीर्य्यतेऽस्मात् अत्र वा। शॄ + अपादानेऽधिकरणे वा अप्। क्षीरं शृणाति विकृतीकरोतीति। शॄ + कर्त्तरि अच्।) दधियोगात् पक्वोष्णदुग्धजातः। छाना इति भाषा। तत्पर्य्यायः। आमिक्षा २ पयस्या ३। इति हेमचन्द्रः॥

क्षीरशीर्षः, पुं, (क्षीरं शीर्षेऽस्य।) श्रीवासः। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरवत् शुभ्रा शुक्ला।) क्षीरविदारी। क्षीरकाकोली। इति राजनिर्घण्टः॥ (क्षीरविदारीशब्दे विवरणमस्या ज्ञेयम्॥)

क्षीरशुक्लः, पुं, (क्षीरवत् शुक्लः।) जलकण्टकः। पानिफल इति भाषा। इति शब्दचन्द्रिका॥ राजादनी। क्षीरणी इति भाषा। इति राजनिर्घण्टः॥

क्षीरशुक्ला, स्त्री, (क्षीरमिव शुक्ला।) शुक्लभूमिकुष्माण्डः। इत्यमरः। २।४।११०॥ (यथास्याः पर्य्यायाः।
"क्षीरशुक्ला विदारीक्षुविदारी च पलाशिका।
प्रसिद्धो भूमिकुष्माण्डो विदारीकन्द इत्यपि"॥
इति वैद्यकरत्नमालायाम्॥
"विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता।
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना गृष्टिर्वृदरेत्यपि कथ्यते"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"जीवकर्षभकौ मेदां श्रावणीं कर्कटाह्वयम्।
मुद्गमाषाख्यपर्ण्यौ च महतीं श्रावणीन्तथा"॥
काकोलीं क्षीरकाकोलीं क्षुद्रां छिन्नरुहान्तथा।
क्षीरशुक्लांपयस्याञ्च यष्ट्याह्वं विधिना पिबेत्।
वातपित्तहितान्येतान्यादीनि तु कफानिले"॥
इति चरके कल्पस्थाने ७ अध्यायः॥)

क्षीरसः, पुं, (क्षीरं स्यतीति। सो + कः।) क्षीरसारः। इति राजनिर्घण्टः॥

क्षीरसन्तानिका, स्त्री, (क्षीरस्य दुग्धस्य सन्तानिका इव।) दुग्धविकारविशेषः। छाना इति नटक्षीर इति च भाषा। अस्या गुणाः। "क्षीरसन्तानिका वृष्या स्निग्धा पित्तानिलापहा"। इति राजवल्लभः॥

क्षीरसमुद्रः, पुं, (क्षीरतुल्यः स्वादुरसः क्षीरमयो वा समुद्रः।) दुग्धसागरः। स तु श्वेतद्वीपे वर्त्तते। यथा। क्षीरसमुद्राय नमः श्वेतद्वीपाय नमः इत्यादि पीठन्यासप्रकरणे तन्त्रसारः॥

क्षीरसागरसुता, स्त्री, (क्षीरसागरस्य क्षीरोदसमुद्रस्य सुता।) लक्ष्मीः। इति कविकल्पलता॥

क्षीरसारः, पुं, (क्षीरस्य दुग्धस्य सारः। यद्वा क्षीरं सरति प्राप्नोति कारणत्वेन इति। क्षीर + सृ + "कर्म्मण्यण्"। ३।२।१। इति अण्।) क्षीरविशेषः। पालजिनु इति हिन्दी भाषा। तत्पर्य्यायः। क्षीरसः २। यथा,—
"ईषच्छ्लेष्मकरं गौल्यं पित्तघ्नं तर्पणं गुरु।
पुष्टिं चैवाभिधा तस्य क्षीरसारस्य क्षीरसः"।
इति राजनिर्घण्टः॥

क्षीरस्फटिकः, पुं, (क्षीरवत् शुभ्रः स्फटिकः।) क्षीरवर्णस्फटिकविशेषः। यथा,—
"सूर्य्यकान्तः सूर्य्यमणिः सूर्य्याश्मा दहनोपलः।
चन्द्रकान्तश्चन्द्रमणिश्चन्द्रश्चन्द्रोपलश्च सः॥
क्षीरतैलस्फटिकाभ्यामन्यौ खस्फटिकाविमौ"॥
इति हेमचन्द्रः॥

क्षीरस्रवः पुं, (क्षीरस्य स्रवः कालोत्पन्नेषा इव। घनीभूतत्वात्तथात्वम्।) दुग्धपाषाणः। इति राजनिर्घण्टः॥

क्षीरा, स्त्री, (क्षीरवर्णोऽस्त्यस्याः इति "अर्श आदिभ्योऽच्"। ५।२।१२७। इत्यच्। ततष्टाप्।) काकोली। इति राजनिर्घण्टः॥ (काकोलीशब्देऽस्या गुणादयो ज्ञातव्याः॥)

क्षीराब्धिः, पुं, (क्षीरमयोऽब्धिः क्षीरस्याब्धिर्वा।) क्षीरसमुद्रः। इति शब्दरत्नावली॥

क्षीराब्धिजं, क्ली, (क्षीराब्धेः क्षीरोदसागरात् जायते इति। जन् + डः।) सामुद्रलवणम्। मौक्तिकम्। इति मेदिनी॥

क्षीराब्धिजः, पुं, (क्षीराब्धेर्जायते इति। जन् + डः।) चन्द्रः। इति मेदिनी॥

क्षीराब्धिजा, स्त्री, (क्षीराब्धिज + टाप्।) लक्ष्मीः। इति मेदिनी॥ (यथा, भागवते ८।८।८।
"ततश्चाविरभूत्साक्षात् श्रीरमा भगवत्परा।
रञ्जयन्ती दिशः कान्त्या विद्युत्सौदामनी यथा"॥)

क्षीराब्धितनया, स्त्री, (क्षीराब्धेः तनया कन्या।) लक्ष्मीः। इत्यमरः। १।१।२९॥

क्षीराविका, स्त्री, (क्षीरं अवतीति। "कर्म्मण्यण्"। ततो ङीप् ततः स्वार्थे कन् टापि पूर्व्वह्रस्वः।) क्षीरावी। इति शब्दरत्नावली॥

क्षीरावी, स्त्री, (क्षीरं अवतीति "कर्म्मण्यण्"। ३।२।१। इत्यण्। ङीप् च।) दुग्धिका। इत्यमरः। २।४।१००॥ तत्पर्य्यायः। ग्राहिणी २ कच्छुरा ३ ताम्रमूला ४ मरुद्भवा ५। इति रत्नमाला॥ द्वे क्षीराई इति ख्यातायाम्। इयञ्च वकुलपत्रतुल्यपत्रा लताच्छेदे क्षीरं स्रवतीति सुभूतिः। तन्मते दुधिया कोंगा इति ख्यातायामित्यनुमीयते। द्वे क्षीरकाकोल्यामिति स्वामी। क्षीरमवति रक्षति क्षीरावी अव रक्षे भ्रम् ईप्। दुग्धमस्त्यस्याः दुग्धिका विकारसंघेति ण्यिकः। इति भरतः॥ अन्यद्दुग्धिकाशब्दे द्रष्टव्यम्॥

क्षीराङ्कः, पुं, (क्षीरं आकयते स्पर्द्धते इति। कं + कः।) सरलवृक्षः। इति त्रिकाण्डशेषः॥

क्षीरिका, स्त्री, (क्षीरवत् स्वादोऽस्त्यस्य इति ठन्।) क्षीरीवृक्षः। क्षीरखर्ज्जूर इति पिण्डखर्ज्जूर इति च केचित्। तत्पर्य्यायः। राजादनः २ फलाध्यक्षः ३। इत्यमरः।२।४।४५॥ राजातनः ४ राजादनफलम् ५ अध्यक्षम् ६ मधुका ७ क्षीरवृक्षः ८ पलाशी ९ मर्क्कटप्रियः १० गुरुस्कन्धः ११ श्लेष्मला १२ व्यातपली १३ दृषा १४ मौलिकाजाली १५। इति भरतधृतवाचस्पतिः॥ क्षीरिवृक्षः १६ वानरप्रियः१७। इति रत्नमाला॥ राजन्यः १८ प्रियदर्शनः१९ दृढ़स्कन्धः २० कपीठः २१। इति जटा-